# Vishnuproktam Kumbhaghoneshvararchanopadesham

# વિષ્ણુપ્રોક્તં કુમ્ભઘોણેશ્વરાર્ચનોપદેશમ્

## Document Information

Text title : Vishnuproktam Kumbhaghoneshvararchanopadesham

File name : viShNuproktaMkumbhaghoNeshvarArchanopadesham.itx

Category : shiva, shivarahasya, upadesha, advice

Location : doc_shiva

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | ugrAkhyaH saptamAMshaH | adhyAyaH 26 kumbhaghoNamahimAnuvarNanam | 598-610||

Latest update : June 16, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 16, 2024

*sanskritdocuments.org*

# વિષ્ણુપ્રોક્તં કુમ્ભઘોણેશ્વરાર્ચનોપદેશમ્

(શિવરહસ્યાન્તર્ગતે ઉગ્રાખ્યે)
વિષ્ણુઃ (ઉવાચ)
અતોઽન્વહં પૂજનીયઃ પ્રયત્નેન મહેશ્વરઃ ।
યતો વેદોદિતં નિત્યં શ્રીમહાદેવ પૂજનમ્ ॥ ૫૯૮॥

અત્ર શ્રીકુમ્ભઘોણેશં પૂજયિત્વા વસામ્યહમ્ ।
મમ શ્રીત્ર્યમ્બકાદન્યઃ પૂજ્યો નાસ્ત્યેવ સર્વથા ॥ ૫૯૯॥

શ્રૂયતે મુક્તિદા નિત્યં મહાદેવકથા મયા ।
મહાશૈવૈઃ સહ પ્રીતિઃ ક્રિયતે સર્વદા મયા ॥ ૬૦૦॥

દિનાનિ ક્ષણવદ્યાન્તિ શિવપૂજાપરસ્ય મે ।
દુઃખમાત્રં વિહાયાત્ર શિવક્ષેત્રે વસામ્યહમ્ ॥ ૬૦૧॥

પૂજયિત્વાઽત્ર ગૌરીશં કુમ્ભઘોણાભિધે વિધે ।
સર્વકામપ્રદં લિઙ્ગં કુમ્ભઘોણેશ્વરાભિધમ્ ॥ ૬૦૨॥

સર્વાર્થદાયકં (લિઙ્ગં) યસ્માચ્છ્રીમહાદેવપૂજનમ્ ।
અતઃ કુરુપ્રયત્નેન શિવલિઙ્ગસ્ય પૂજનમ્ ॥ ૬૦૩॥

શિવલિઙ્ગાર્ચનેનૈવ મુક્તિસ્તવ ભવિષ્યતિ ।
શિવલિઙ્ગાર્ચનાદન્યન્નાસ્તિ મુક્તિપ્રદં વિધે ॥ ૬૦૪॥

ઉદ્ધૂલ્ય ભસ્મનાઙ્ગાનિ ધૃત્વા ચૈવ ત્રિપુણ્ડ્રકમ્ ।
રુદ્રાક્ષધારણાં કૃત્વા પૂજયસ્વ સદાશિવમ્ ॥ ૬૦૫॥

અભિષિચ્ય મહાદેવં રુદ્રાધ્યાયેન સાદરમ્ ।
ભસ્મના બિલ્વપત્રૈશ્ચ પૂજયસ્વ મહેશ્વરમ્ ॥ ૬૦૬॥

પૂજાન્તે જપ યત્નેન શૈવં પઞ્ચાક્ષરં શિવે ।
શ્રીરુદ્રં જપ યત્નેન તતઃ સર્વાઘનાશનમ્ ॥ ૬૦૭॥

પઞ્ચાક્ષરેણ રુદ્રેણ પ્રીણયસ્વ સદાશિવમ્ ।
રુદ્રપઞ્ચાક્ષરાભ્યાં તુ પ્રીતો ભવતિ શઙ્કરઃ ॥ ૬૦૮॥

ષડક્ષરેણ રુદ્રેણ યઃ પ્રીણયતિ શઙ્કરમ્ ।
અઘોરતપસા રુદ્રં સ પ્રીણયતિ નાન્યથા ॥ ૬૦૯॥

રુદ્રપઞ્ચાક્ષરજપી મુક્ત એવ ન સંશયઃ ।
ન તતોગ્રયં તપઃ કિઞ્ચિત્સત્યમેવોચ્યતે મયા ॥ ૬૧૦॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે વિષ્ણુપ્રોક્તં કુમ્ભઘોણેશ્વરાર્ચનોપદેશં ૨ સમ્પૂર્ણમ્ ॥

- ॥ શ્રીશિવરહસ્યમ્ । ઉગ્રાખ્યઃ સપ્તમાંશઃ । અધ્યાયઃ ૨૬ કુમ્ભઘોણમહિમાનુવર્ણનમ્ । ૫૯૮-૬૧૦॥

- .. shrIshivarahasyam . ugrAkhyaH saptamAMshaH . adhyAyaH 26 kumbhaghoNamahimAnuvarNa
. 598-610..

Notes:
Upon being requested by Deva-s દેવાઃ; Viṣṇu વિષ્ણુ mentions that Mahādeva મહાદેવ and the Śivaliṅga શિવલિઙ્ગ must be worshipped with all due efforts. He further tells them that is worshiping Śiva શિવ while residing at Kumbhaghoṇam કુમ્ભઘોણમ્ where He is known as Kumbhaghoṇeśa કુમ્ભઘોણેશ and manifests as Kumbhaghoṇeśvara Sivaliṅgam કુમ્ભઘોણેશ્વર શિવલિઙ્ગમ્.
Viṣṇu વિષ્ણુ and delivers Upadeśa ઉપદેશ about merits of worshiping Śiva શિવ especially with Pañcākṣara mantra પઞ્ચાક્ષર મન્ત્ર, Ṣaḍakṣara manta ષડક્ષર મન્ત્ર and Śrī Rudram japa શ્રીરુદ્રં જપ.

Proofread by Ruma Dewan

*Vishnuproktam Kumbhaghoneshvararchanopadesham*
pdf was typeset on June 16, 2024

Please send corrections to *sanskrit@cheerful.com*